श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री चैतन्यमहाप्रभु विरचितं

# ॥ शिक्षाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शिक्षाष्टकम् ॥

चेतोदर्पणमार्जनं भवमहादावाग्नि -निर्वापणं
श्रेयःकैरवचन्द्रिका वितरणं विद्यावधू -जीवनम्।
आनन्दाम्बुधिवर्धनं प्रतिपदं पूर्णामृतास्वादनं
सर्वात्मस्नपनं परं विजयते श्रीकृष्ण -सङ्कीर्तनम्॥ 1 ॥

नाम्नामकारि बहुधा निज सर्वशक्ति -
स्तत्रार्पिता नियमितः स्मरणे न कालः।
एतादृशी तव कृपा भगवन् ममापि
दुर्दैवमीदृशमिहाजनि नानुरागः॥ 2 ॥

तृणादपि सुनीचेन तरोरपि सहिष्णुना।
अमानिना मानदेन कीर्तनीयः सदा हरिः॥ 3 ॥

न धनं न जनं न सुन्दरीं
कवितां वा जगदीश कामये।
मम जन्मनि जन्मनीश्वरे
भवताद् भक्तिरहैतुकी त्वयि॥ 4 ॥

अयि नन्दतनुज किङ्करं
पतितं मां विषमे भवाम्बुधौ।
कृपया तव पादपङ्कज -
स्थितधूलिसदृशं विचिन्तय॥ 5 ॥

नयनं गलदश्रुधारया वदनं गद्गदरुद्धया गिरा।
पुलकैर्निचितं वपुःकदा तव नामग्रहणे भविष्यति ॥ **6** ॥

युगायितं निमेषेण चक्षुषा प्रावृषायितम्।
शून्यायितं जगत् सर्वं गोविन्द विरहेण मे ॥ **7** ॥

आश्लिष्य वा पादरतां पिनष्टु माम्
    अदर्शनान् मर्महतां करोतु वा।
यथा तथा वा विदधातु लम्पटो
    मत्प्राणनाथस्तु स एव नापरः ॥ **8** ॥

॥ शिक्षाष्टकं समाप्तम् ॥